# परिसिस्ट १

## मन मैँ राक्खो इन बचनाँ नै

*गीत्ता सारी याद रखण की, दुनियाँ का ए भला करण की।*
*पोत्थी सै या, इस मैँ बी पर, लाग्गे मन्नै बचन भोत-से।।*
*इमरत सार निचोड़्या उन मैँ, कट्ठे कर कैँ दिये उरै सैँ।*
*अद्ध्यायाँ स्लोक्काँ कै क्रम तैँ, मन मैँ राक्खो, इन पै चाल्लो।।*

१ न च श्रेयोऽनुपश्यामि, हत्वा स्वजनमाहवे।। १.३१

२ स्वजनं हि कथं हत्वा, सुखिनः स्याम माधव।। ३७

३ धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत।। ४०

४ सङ्करो नरकायैव, कुलघ्नानां कुलस्य च।। ४२

५ उत्सन्नकुलधर्माणां, मनुष्याणां जनार्दन।
नरकेऽनियतं वासो, भवतीत्यनुशुश्रुम।। ४४।।

६ क्लैब्यं मा स्म गमः पार्थ, नैतत् त्वय्युपपद्यते।
क्षुदं हृदयदौर्बल्यं, त्यक्त्वोत्तिष्ठ परंतप।। २.३

७ कार्पण्यदोषोपहतस्वभावः, पृच्छामि त्वां धर्मसंमूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे, शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।।

८ अशोच्यानन्वशोचस्त्वं, प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च, नानुशोचन्ति पण्डिताः।। ११

९ देहिनोऽस्मिन् यथा देहे, कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्, धीरस्तत्र न मुह्यति।। १३

१० नासतो विद्यते भावो, नाभावो विद्यते सतः।। १६

११ अविनाशि तु तद्विद्धि, येन सर्वमिदं ततम्।। १७

१२ अन्तवन्त इमे देहा, नित्यस्योक्ताः शरीरिणः।। १८

१३ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो, न हन्यते हन्यमाने शरीरे।। २०



१४ वासांसि जीर्णानि यथा विहाय, नवानि गृह्णाति नरोपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही।। २.२२

१५ नैनं छिन्दन्ति शस्त्राणि, नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो, न शोषयति मारुतः।। २३

१६ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।। २७

१७ अव्यक्तादीनि भूतानि, व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव, तत्र का परिदेवना।। २८

१८ देही नित्यमवध्योऽयं, देहे सर्वस्य भारत।। ३०

१९ धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते।। ३१

२० सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते।। ३४

२१ हतो वा प्राप्स्यसि स्वर्गं, जित्वा वा भोक्ष्यसे महीम्।। ३७

२२ सुखदुःखे समे कृत्वा, लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व, नैवं पापमवाप्स्यसि।। ३८

२३ नेहाभिक्रमनाशोऽस्ति, प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य, त्रायते महतो भयात्।। ४०

२४ व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च, बुद्धयोऽव्यवसायिनाम्।। ४१

२५ यामिमां पुष्पितां वाचं, प्रवदन्त्यविपश्चितः।। ४२

२६ भोगैश्वर्यप्रसक्तानां, तयापहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः, समाधौ न विधीयते।। ४४

२७ त्रैगुण्यविषया वेदा, निस्त्रैगुण्यो भवार्जुन।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्।। ४५

२८ यावानर्थ उदपाने, सर्वतः सम्प्लुतोदके।
तावान् सर्वेषु वेदेषु, ब्राह्मणस्य विजानतः।। ४६

२९ कर्मण्येवाधिकारस्ते, मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्, मा ते सङ्गोऽस्त्वकर्मणि।। ४७

३० योगस्थः कुरु कर्माणि, सङ्गं त्यक्त्वा धनंजय।
सिद्ध्यसिद्ध्योः समो भूत्वा, समत्वं योग उच्यते।। २.४८
३१ दूरेण ह्यवरं कर्म, बुद्धियोगाद्धनंजय।
बुद्धौ शरणमन्विच्छ, कृपणाः फलहेतवः।। ४९
३२ बुद्धियुक्तो जहातीह, उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व, योगः कर्मसु कौशलम्।। ५०
३३ प्रजहाति यदा कामान्, सर्वान् पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः, स्थितप्रज्ञस्तदोच्यते।। ५५
३४ विषया विनिवर्तन्ते, निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य, परं दृष्ट्वा निवर्तते।। ५९
३५ वशे हि यस्येन्द्रियाणि, तस्य प्रज्ञा प्रतिष्ठिता।। ६१
३६ ध्यायतो विषयान् पुंसः, सङ्गस्तेषूपजायते।
सङ्गात्सञ्जायते कामः, कामात्क्रोधोऽभिजायते।। ६२
३७ क्रोधाद्भवति सम्मोहः, सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो, बुद्धिनाशात्प्रणश्यति।। ६३
३८ प्रसादे सर्वदुःखानां, हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु, बुद्धिः पर्यवतिष्ठते।। ६५
३९ नास्ति बुद्धिरयुक्तस्य, न चायुक्तस्य भावना।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्।। ६६
४० इन्द्रियाणां हि चरतां, यन्मनोऽनु विधीयते।
तदस्य हरति प्रज्ञां, वायुर्नावमिवाम्भसि।। ६७
४१ या निशा सर्वभूतानां, तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि, सा निशा पश्यतो मुनेः।। ६९
४२ विहाय कामान्यः सर्वान्, पुमांश्चरति निःस्पृह।
निर्ममो निरहङ्कारः, स शान्तिमधिगच्छति।। ७१ ।।
४३ न कर्मणामनारम्भान्, नैष्कर्म्यं पुरुषोऽश्नुते।



न च संन्यसनादेव, सिद्धिं समधिगच्छति।। ३.४
४४ न हि कश्चित्क्षणमपि, जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म, सर्वः प्रकृतिजैर्गुणैः।। ३.५
४५ कर्मेन्द्रियाणि संयम्य, य आस्ते मनसा स्मरन्।
इन्द्रियार्थान्विमूढात्मा, मिथ्याचारः स उच्यते।। ६
४६ नियतं कुरु कर्म त्वं, कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते, न प्रसिद्ध्येदकर्मणः।। ८
४७ यज्ञार्थात्कर्मणोऽन्यत्र, लोकोऽयं कर्मबन्धनः।। ९
४८ परस्परं भावयन्तः, श्रेयः परमवाप्स्यथ।। ११
४९ तैर्दत्तानप्रदायैभ्यो, यो भुङ्क्ते स्तेन एव सः।। १२
५० यज्ञाशिष्टाशिनः सन्तो, मुच्यन्ते सर्वकिल्बिषैः।
५१ भुञ्जते ते त्वघं पापा, ये पचन्त्यात्मकारणात्।। १३
५२ तस्मादसक्तः सततं, कार्यं कर्म समाचर।। १९
५३ लोकसंग्रहमेवापि, संपश्यन्कर्तुमर्हसि।। २०
५४ यद्यदाचरति श्रेष्ठस् तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते, लोकस्तदनुवर्तते।। २१
५५ सक्ताः कर्मण्यविद्वांसो, यथा कुर्वन्ति भारत।
कुर्याद् विद्वांस्तथासक्तश् चिकीर्षुर्लोकसंग्रहम् ।। २५
५६ न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।। २६
गुणा गुणेषु वर्तन्त, इति मत्वा न सज्जते।। २८
५७ प्रकृतेर्गुणसम्मूढाः, सज्जन्ते गुणकर्मसु।
तानकृत्स्नविदो मन्दान्, कृत्स्नविन्न विचालयेत्।। २९
५८ प्रकृतिं यान्ति भूतानि, निग्रहः किं करिष्यति।। ३३
५९ श्रेयान् स्वधर्मो विगुणः, परधर्मात् स्वनुष्ठितात्।
६० स्वधर्मे निधनं श्रेयः, परधर्मो भयावहः।। ३५
६१ आवृतं ज्ञानमेतेन, ज्ञानिनो नित्यवैरिणा।

कामरूपेण कौन्तेय, दुष्पूरेणानलेन च।। ३९

६२ इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।। ३.४०

६३ जहि शत्रुं महाबाहो, कामरूपं दुरासदम्।। ४३।।

६४ यदा यदा हि धर्मस्य, ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य, तदात्मानं सृजाम्यहम्।। ४.७

६५ परित्राणाय साधूनां, विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय, संभवामि युगे-युगे।। ८

६६ ये यथा मां प्रपद्यन्ते, तांस्तथैव भजाम्यहम्।। ११

६७ चातुर्वर्ण्यं मया सृष्टं, गुणकर्मविभागशः।। १३

६८ किं कर्म किमकर्मेति, कवयोऽप्यत्र मोहिताः।। १६

६९ कर्मणो ह्यपि बोद्धव्यं, बोद्धव्यं च विकर्मणः।
अकर्मणश्च बोद्धव्यं, गहना कर्मणो गतिः।। १७

७० गतसङ्गस्य मुक्तस्य, ज्ञानावस्थितचेतसः।
यज्ञायाचरतः कर्म, समग्रं प्रविलीयते।। २३

७१ नायं लोकोऽस्त्ययज्ञस्य, कुतोऽन्यः कुरुसत्तम।। ३१

७२ सर्वं कर्माखिलं पार्थ, ज्ञाने परिसमाप्यते।। ३३

७३ ज्ञानाग्निः सर्वकर्माणि, भस्मासात् कुरुते तथा।। ३७

७४ न हि ज्ञानेन सदृशं, पवित्रमिह विद्यते।। ३८

७५ श्रद्धावाँल्लभते ज्ञानं, तत्परः संयतेन्द्रियः।। ३९

७६ अज्ञश्चाश्रद्दधानश्च, संशयात्मा विनश्यति।

७७ नायं लोकोऽस्ति न परो, न सुखं संशयात्मनः।। ४०

७८ आत्मवन्तं न कर्माणि, निबध्नन्ति धनंजय।। ४१।।

७९ ज्ञेयः स नित्यसंन्यासी, यो न द्वेष्टि न काङ्क्षति।

८० निर्द्वन्द्वो हि महाबाहो, सुखं बन्धात्प्रमुच्यते।। ५.३

८१ सांख्ययोगौ पृथग् बालाः, प्रवदन्ति न पण्डिताः।। ४
यत्सांख्यैः प्राप्यते स्थानं, तद्योगैरपि गम्यते।। ५



८२ संन्यासस्तु महाबाहो, दुःखमाप्तुमयोगतः।। ६

८३ ब्रह्मण्याधाय कर्माणि, सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन, पद्मपत्रमिवाम्भसा।। ५.१०

८४ अयुक्तः कामकारेण, फले सक्तो निबध्यते।। १२

८५ न कर्तृत्वं न कर्माणि, लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं, स्वभावस्तु प्रवर्तते।। १४

८६ नादत्ते कस्यचित् पापं, न चैव सुकृतं विभुः।

८७ अज्ञानेनावृतं ज्ञानं, तेन मुह्यन्ति जन्तवः।। १५

८८ विद्याविनयसंपन्ने, ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च, पण्डिताः समदर्शिनः।। १८

८९ इहैव तैर्जितः सर्गो, येषां साम्ये स्थितं मनः।। १९

९० ये हि संस्पर्शजा भोगा, दुःखयोनय एव ते।। २२।।

९१ अनाश्रितः कर्मफलं, कार्यं कर्म करोति यः।
स संन्यासी च योगी च, न निरग्निर्न चाक्रियः।। ६.१

९२ न ह्यसंन्यस्तसंकल्पो, योगी भवति कश्चन।। २

९३ उद्धरेदात्मनाऽऽत्मानं, नात्मानमवसादयेत्।

९४ आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।। ५

९५ सुहृन्मित्रार्युदासीन-मध्यस्थद्वेष्यबन्धुषु।

९६ साधुष्वपि च पापेषु, समबुद्धिर्विशिष्यते।। ९

९७ यो मां पश्यति सर्वत्र, सर्वं च मयि पश्यति।
तस्याहं न प्रणश्यामि, स च मे न प्रणश्यति।। ३०

९८ आत्मौपम्येन सर्वत्र, समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं, स योगी परमो मतः।। ३२

९९ चञ्चलं हि मनः कृष्ण, प्रमाथि बलवद् दृढम्।
तस्याहं निग्रहं मन्ये, वायोरिव सुदुष्करम्।। ३४

१०० असंशयं महाबाहो, मनो दुर्निग्रहं चलम्।

अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते।। ३५

१०१ न हि कल्याणकृत्कश्चिद्, दुर्गतिं तात गच्छति।। ६.४०

१०२ शुचीनां श्रीमतां गेहे, योगभ्रष्टोऽभिजायते।। ४१

१०३ जिज्ञासुरपि योगस्य, शब्दब्रह्मातिवर्तते।। ४४

१०४ तपस्विभ्योऽधिको योगी, ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी, तस्माद् योगी भवार्जुन।। ४६

१०५ श्रद्धावान् भजते यो मां, स मे युक्ततमो मतः।। ४७।।

१०६ मनुष्याणां सहस्रेषु, कश्चिद् यतति सिद्धये।
यततामपि सिद्धानां, कश्चिन्मां वेत्ति तत्त्वतः।। ७.३

१०७ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहंकार इतीयं मे, भिन्ना प्रकृतिरष्टधा।। ४
अपरेयमितस्त्वन्यां, प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो, ययेदं धार्यते जगत्।। ५

१०८ मयि सर्वमिदं प्रोतं, सूत्रे मणिगणा इव।। ७

१०९ ये चैव सात्त्विका भावा, राजसास्तामसाश्च ये।
मत्त एवेति तान्विद्धि, न त्वहं तेषु, ते मयि।। १२

११० दैवी ह्येषा गुणमयी, मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते, मायामेतां तरन्ति ते।। १४

१११ बहूनां जन्मनामन्ते, ज्ञानवान् मां प्रपद्यते।। १९

११२ कामैस्तैस्तैर्हृतज्ञानाः, प्रपद्यन्तेऽन्यदेवताः।
तं तं नियममास्थाय, प्रकृत्या नियताः स्वया।। २०।।

११३ अक्षरं ब्रह्म परमं, स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो, विसर्गः कर्मसंज्ञितः।। ८.३

११४ यं यं वापि स्मरन् भावं, त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय, सदा तद्भावभावितः।। ६

११५ मय्यर्पितमनोबुद्धिर्, मामेवैष्यस्यसंशयम्।। ७



११६ आब्रह्मभुवनाल्लोकाः, पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय, पुनर्जन्म न विद्यते।। ८.१६

११७ यस्यान्तःस्थानि भूतानि, येन सर्वमिदं ततम्।। २२।।

११८ मत्स्थानि सर्वभूतानि, न चाहं तेष्ववस्थितः।। ९.४

११९ त्रैविद्या मां सोमपाः पूतपापा, यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।। २०
ते तं भुक्त्वा स्वर्गलोकं विशालं, क्षीणे पुण्ये मर्त्यलोकं विशन्ति। २१

१२० एवं त्रयीधर्ममनुप्रपन्ना, गतागतं कामकामा लभन्ते।। २१

१२१ अनन्याश्चिन्तयन्तो मां, ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां, योगक्षेमं वहाम्यहम्।। २२

१२२ येऽप्यन्यदेवता भक्ता, यजन्ते श्रद्धयाऽन्विताः।
तेऽपि मामेव कौन्तेय, यजन्त्यविधिपूर्वकम्।। २३

१२३ यान्ति देवव्रता देवान्, पितृन् यान्ति पितृव्रताः।
भूतानि यान्ति भूतेज्या, यान्ति मद्याजिनोऽपि माम्।। २५

१२४ पत्रं पुष्पं फलं तोयं, यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।। २६

१२५ यत् करोषि यदश्नासि, यज्जुहोषि ददासि यत्।
यत् तपस्यसि कौन्तेय, तत् कुरुष्व मदर्पणम्।। २७

१२६ अपि चेत्सुदुराचारो, भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः, सम्यग्व्यवसितो हि सः।। ३०

१२७ कौन्तेय प्रतिजानीहि, न मे भक्तः प्रणश्यति।। ३१

१२८ अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्।। ३३

१२९ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः।। ३४।।

१३० बुद्धिर्ज्ञानमसम्मोहः, क्षमा सत्यं दमः शमः।
सुखं दुःखं भवोऽभावो, भयं चाभयमेव च।। १०.४
अहिंसा समता तुष्टिस्, तपो दानं यशोऽयशः।

भवन्ति भावा भूतानां, मत्त एव पृथग्विधाः।। ५

१३१ तेषां सततयुक्तानां, भजतां प्रीतिपूर्वकम्।

ददामि बुद्धियोगं तं, येन मामुपयान्ति ते।। १०.१०

१३२ वेदानां सामवेदोऽस्मि। २२ १३३ इन्द्रियाणां मनश्चास्मि। २२

१३४ भूतनामस्मि चेतना।। २२ १३५ गिरामस्म्येकमक्षरम्।। २५

१३६ अश्वत्थः सर्ववृक्षाणां।। २६ १३७ नराणां च नराधिपम्।। २७

१३८ धेनूनामस्मि कामधुक्।। २८ १३९ कालः कलयतामहम्।। ३०

१४० स्रोतसामस्मि जाह्नवी।। ३१ १४१ अध्यात्मविद्या विद्यानां।३१

१४२ वादः प्रवदतामहम्।। ३२ १४३ अक्षराणामकारोऽस्मि।३२

१४४ द्वन्द्वः सामासिकस्य च।। ३३

१४५ कीर्तिः श्रीर्वाक्च नारीणां, स्मृतिर्मेधा धृतिः क्षमा।। ३४

१४६ मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः।। ३५

१४७ द्यूतं छलयतामस्मि। ३५ १४८ तेजस्तेजस्विनामहम्। ३५

१४९ जयोऽस्मि व्यवसायोऽस्मि।३५ १५० सत्त्वं सत्त्ववतामहम्।। ३६

१५१ दण्डो दमयतामस्मि।३६ १५२ नीतिरस्मि जिगीषताम्।३६

१५३ मौनं चैवास्मि गुह्यानां।३६ १५४ ज्ञानं ज्ञानवतामहम्।। ३८

१५५ न तदस्ति विना यत् स्यान् मया भूतं चराचरम्।। ३९

१५६ नान्तोऽस्ति मम दिव्यानां, विभूतीनां परंतप।। ४०

१५७ यद् यद् विभूतिमत् सत्त्वं, श्रीमदूर्जितमेव वा।

तत्तदेवावगच्छ त्वं, मम तेजोंऽशसम्भवम्।। ४१

१५८ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्।। ४२।।

१५९ दिवि सूर्यसहस्रस्य, भवेद् युगपदुत्थिता।

यदि भाः सदृशी सा स्याद्, भासस्तस्य महात्मनः।। ११.१२

१६० मयैवैते निहताः पूर्वमेव, निमित्तमात्रं भव सव्यसाचिन्।। ३३

१६१ मया हतांस्त्वं जहि मा व्यथिष्ठा, युध्यस्व जेतासि रणे सपत्नान्।। ३४

१६२ स्थाने हृषीकेश तव प्रकीर्त्या, जगत्प्रहृष्यत्यनुरज्यते च।। ३६



१६३ पितेव पुत्रस्य सखेव सख्युः, प्रियः प्रियायार्हसि देव सोढुम्।। ४४

१६४ न वेदयज्ञाध्ययनैर्न दानैर्, न च क्रियाभिर्न तपोभिरुग्रैः।

एवंरूपः शक्य अहं नृलोके, द्रष्टुं त्वदन्येन कुरुप्रवीर।। ११.४८

१६५ नाहं वेदैर्न तपसा, न दानेन न चेज्यया।

शक्य एवंविधो द्रष्टुं, दृष्टवानसि मां यथा।। ५३

१६६ भक्त्या त्वनन्यया शक्य, अहमेवंविधोऽर्जुन।

ज्ञातुं द्रष्टुं च तत्त्वेन, प्रवेष्टुं च परंतप।। ५४।।

१६७ मय्येव मन आधत्स्व, मयि बुद्धिं निवेशय।

निवसिष्यसि मय्येव, अत ऊर्ध्वं न संशयः।। १२.८

१६८ श्रेयो हि ज्ञानमभ्यासात्। १२

१६९ त्यागाच्छान्तिरनन्तरम्।। १२

१७० समः शत्रौ च मित्रे च, तथा मानापमानयोः।

शीतोष्णसुखदुःखेषु, समः सङ्गविवर्जितः।। १८

१७१ तुल्यनिन्दास्तुतिर्मौनी, संतुष्टो येन केनचित्।

अनिकेतः स्थिरमतिर्, भक्तिमान् मे प्रियो नरः।। १९।।

१७२ इदं शरीरं कौन्तेय, क्षेत्रमित्यभिधीयते।। १३.१

१७३ महाभूतान्यहंकारो, बुद्धिरव्यक्तमेव च।

इन्द्रियाणि दशैकं च, पञ्च चेन्द्रियगोचराः।। ५

इच्छा द्वेषः सुखं दुःखं, संघातश्चेतना धृतिः।

एतत्क्षेत्रं समासेन, सविकारमुदाहृतम्।। ६

१७४ ज्ञेयं यत् तत् प्रवक्ष्यामि, यज्ज्ञात्वामृतमश्नुते।

अनादिमत् परं ब्रह्म, न सत् तन्नासदुच्यते।। १२

बहिरन्तश्च भूतानामचरं चरमेव च।

सूक्ष्मत्वात् तदविज्ञेयं, दूरस्थं चान्तिके च तत्।। १५

ज्योतिषामपि तज्ज्योतिस्, तमसः परमुच्यते।। १७

१७५ इति क्षेत्रं तथा ज्ञानं, ज्ञेयं चोक्तं समासतः।

मद्भक्त एतद् विज्ञाय, मद्भावायोपपद्यते।। १८

१७६ प्रकृतिं पुरुषं चैव, विद्ध्यनादी उभावपि।

विकारांश्च गुणांश्चैव, विद्धि प्रकृतिसम्भवान्।। १३.१९

१७७ कार्यकरणकर्तृत्वे, हेतुः प्रकृतिरुच्यते।

पुरुषः सुखदुःखानां, भोक्तृत्वे हेतुरुच्यते।। २०

१७८ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।

सर्वभावस्थितोऽपि देहे, तथाऽऽत्मा नोपलिप्यते।। ३२।।

१७९ ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।

छन्दांसि यस्य पर्णानि, यस्तं वेद स वेदवित्।। १५.१

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा, गुणप्रवृद्धा विषयप्रवालाः।

अधश्च मूलान्यनुसंततानि, कर्मानुबन्धीनि मनुष्यलोके।। २

न रूपमस्येह तथोपलभ्यते, नान्तो न चादिर्न च संप्रतिष्ठा।

अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा।। ३

ततः पदं तत्परिमार्गितव्यं, यस्मिन्गता न निवर्तन्ति भूपः।। ४

१८० ममैवांशो जीवलोके, जीवभूतः सनातनः।

मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।। ७

१८१ शरीरं यदवाप्नोति, यच्चाप्युत्क्रामतीश्वरः।

गृहीत्वैतानि संयाति, वायुर्गन्धानिवाशयात्।। ८

१८२ सर्वस्य चाहं हृदि संनिविष्टो, मत्तः स्मृतिर्ज्ञानमपोहनं च।

वेदैश्च सर्वैरहमेव वेद्यो, वेदान्तकृद्वेदविदेव चाहम्।। १५

१८३ द्वाविमौ पुरुषौ लोके, क्षरश्चाक्षर एव च।

क्षरः सर्वाणि भूतानि, कूटस्थोऽक्षर उच्यते।। १६

१८४ उत्तमः पुरुषस्त्वन्यः, परमात्मेत्युदाहृतः।

यो लोकत्रयमाविश्य, बिभर्त्यव्यय ईश्वरः।। १७।।

१८५ ॐ तत्सदिति निर्देशो, ब्रह्मणस्त्रिविधः स्मृतः। १७. २३

सद्भावे साधुभावे च, सदित्येतत् प्रयुज्यते।



प्रशस्ते कर्मणि तथा, सच्छब्दः पार्थ युज्यते।। २६

यज्ञे तपसि दाने च, स्थितिः सदिति चोच्यते।

कर्म चैव तदर्थीयं, सदित्येवाभिधीयते।। १७.२७।।

१८६ सहजं कर्म कौन्तेय, सदोषमपि न त्यजेत्।

सर्वारम्भा हि दोषेण, धूमेनाग्निरिवावृताः।। १८.४८

१८७ यदहंकारमाश्रित्य, 'न योत्स्य' इति मन्यसे।

मिथ्यैष व्यवसायस्ते, प्रकृतिस्त्वां नियोक्ष्यति।। ५९

१८८ ईश्वरः सर्वभूतानां, हृद्देशेऽर्जुन तिष्ठति।

भ्रामयन् सर्वभूतानि, यन्त्रारूढानि मायया।। ६१

१८९ मन्मना भव मद्भक्तो, मद्याजी मां नमस्कुरु।

मामेवैष्यसि सत्यं ते, प्रतिजाने प्रियोऽसि मे।। ६५

१९० सर्वधर्मान् परित्यज्य, मामेकं शरणं व्रज।

अहं त्वां सर्वपापेभ्यो, मोक्षयिष्यामि मा शुचः।। ६६

१९१ यत्र योगेश्वरः कृष्णो, यत्र पार्थो धनुर्धरः।

तत्र श्रीर्विजयो भूतिर्, ध्रुवा नीतिर्मतिर्मम।। ७८।।